दिनाङ्क :- 12.08.2025 सायम् - 06:20

## मुख्यवार्ता:

- ओडिशा, पञ्जाब, आन्ध्रप्रदेशेषु चतस्रः नूतनाः सेमीकंडक्टर परियोजनाः सर्वकारेण अनुमोदिताः।
- श्रीवैष्णवः अवदत् यत्, चारबागतः वसंतकुञ्जपर्यन्तं लखनऊमेट्रो बी प्रथमचरणस्य अनुमोदनम् अभवत् यस्य अनुमानित-व्ययः एकोत्तरअष्टशताधिक पञ्चसहस्रकोटिरूप्यकाणि अस्ति।
- लोकसभायाः अध्यक्षेण ओम् बिरला वर्येण उच्चन्यायालयस्य न्यायाधीशस्य यशवन्तवर्मा इत्यस्य विरुद्धं आरोपस्य अन्वेषणार्थं त्रिसदस्यीय-समितिं निर्मितम्।
- नम्रता बात्रा इत्यनया वुशुक्रीडायां चीनदेशस्य चेङ्गडु-नगरे विश्वक्रीडायां भारताय प्रथमपदकं प्रदत्तम् ।
- भारतस्य टेस्ट् क्रिकेट दल नायकः शुबमन गिल् जुलाईमासस्य ICC पुरुषेषु मासस्य उत्तमः क्रीडकत्वेन नामाङ्कितः।

## आईओएए-मुम्बई

अद्य मुम्बईनगरे खगोलविज्ञानस्य खगोलभौतिकशास्त्रस्य च अष्टादशतमं अन्तर्राष्ट्रीय-ओलम्पियाड् (IOAA) इति प्रारब्धम्। प्रधानमन्त्री नरेन्द्रमोदी स्वस्य विडियोसन्देशे उक्तवान् यत्, चतु:षष्ठी देशेभ्यः त्रिशततोप्यधिकैः विशिष्टैः जनैः सह मिलित्वा प्रसन्नः अस्ति। प्रतिष्ठित-कार्यक्रमाय भारते तेषां स्वागतं कृतवान् ।

## मन्त्रिमण्डलस्य विवरणम्

ओडिशा, पञ्जाब, आन्ध्रप्रदेशेषु चतस्रः नूतनाः सेमीकंडक्टर परियोजनाः सर्वकारेण अनुमोदिताः। यस्य अनुमानितव्ययः प्रायः सार्ध चतु:सहस्रकोटिरूप्यकाणां भविष्यति। अद्य नवदिल्ल्यां प्रधानमन्त्रिणः नरेन्द्रमोदिनः आध्यक्षे गृहीतस्य मन्त्रिमण्डलस्य निर्णयस्य विषये वार्ताहारान् ज्ञापयन् सूचनाप्रसारणमन्त्री अश्विनीवैष्णवः अवदत् यत्, सेमीकंडक्टर इत्यस्य इलेक्ट्रॉनिक्सक्षेत्रस्य च कृते सर्वकारः सुदृढं पारिस्थितिकीतन्त्रं निर्माति।

श्रीवैष्णवः अवदत् यत्, विगतैकादश वर्षेषु इलेक्ट्रॉनिक्स वस्तुनिर्माणे षड्गुणितं द्रुतगत्या प्रगतिः अभवत्, निर्याते च अष्टगुणितं वृद्धिः अभवत्। सः अवदत् यत्, विगतैकादश वर्षेषु मोबाईल-विनिर्माण-एकांशानां संख्या द्वि तः त्रिशततोप्यधिका अभवत्। मन्त्री घोषितवान् यत् आगामिमासस्य द्वितीयदिनात् आरभ्य नवदिल्ल्यां पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य सेमीकॉन इण्डिया इत्यस्य आयोजनं भविष्यति। सः अवदत् मलेशिया, जापान, सिङ्गापुर, दक्षिणकोरिया च सेमीकॉन इण्डिया इत्यस्मिन् भागं गृह्णन्ति। श्रीवैष्णवः अवदत् यत्, चारबागतः वसंतकुञ्जपर्यन्तं लखनऊमेट्रो बी प्रथमचरणस्य अनुमोदनम् अभवत् यस्य अनुमानित-व्ययः एकोत्तरअष्टशताधिक पञ्चसहस्रकोटिरूप्यकाणि अस्ति।

सूचनाप्रसारणमन्त्री उक्तवान् यत् सप्तशत मेगावाट् क्षमतया: ताटो-द्वितीय-जल-विद्युत्परियोजनां सर्वकारेण स्वस्वीकृतिः प्रदत्ता। सः अवदत्, अरुणाचलप्रदेशस्य शि-योमी-

मण्डले एषा परियोजना निर्मिता भविष्यति, एतस्य निर्माणं षड्वर्षेषु भविष्यति। सः अवदत् यत्, एषा परियोजना क्षेत्रे विद्युतः स्थिरं स्रोतं प्रदास्यति, क्षेत्रीयविकासं च सम्वर्धयिष्यति। सः अवदत्, भारतस्य जीवाश्म-इन्धनस्य क्षमता पञ्चाशत् प्रतिशततोप्यधिकं जातम्।

## लोकसभा-यशवंत वर्मा

लोकसभायाः अध्यक्षेण ओम् बिरला वर्येण उच्चन्यायालयस्य न्यायाधीशस्य यशवन्तवर्मा इत्यस्य विरुद्धं आरोपस्य अन्वेषणार्थं त्रिसदस्यीय-समितिं निर्मितम्। प्रथमस्य स्थगनस्य अनन्तरं यदा लोकसभायाः उपवेशनम् अपराह्णे द्वादशवादने आरब्धम् तदा अध्यक्षः समित्याः निर्माणस्य घोषणाम् अकरोत्, समितिः यथाशीघ्रं स्वस्य प्रतिवेदनं समर्पयिष्यति इति च उक्तवान्। अध्यक्षः न्यायमूर्ति-वर्मा इत्यस्य निष्कासनस्य अवेदनानि स्वीकृतवान् तथा च सभायै सूचितवान् यत् सः न्यायमूर्ति-यशवन्त-वर्मा इत्यस्य निष्कासनाय षड्चत्वारिंशोत्तरैकशत पक्ष-विपक्ष-पीठयोः संसद-सदस्यानां हस्ताक्षराणि स्वीकृतवान् इति।

## लोकसभा – पोटर्स बिल

लोकसभायां पञ्चविंशत्याधिक द्विसहस्रतम वर्षस्य भारतीयपत्तनविधेयकं पारितम्। अस्य विधेयकस्य उद्देश्यं पत्तनसम्बद्ध विधिएकीकृत्य, पत्तन विकास प्रवर्धनं, व्यापारे सुगमता, भारतीयतटानां उपयोगिता प्रवर्धनम् च अस्ति ।

## निर्वाचनआयोग:

विशिष्टसघनपुनरीक्षणस्य विवादस्य मध्ये भारतस्य निर्वाचनआयोगेन उक्तं यत् आपत्तिकालस्य द्वादश दिवसानां अनन्तरं बिहारे अस्याः प्रक्रियायाः विषये अद्यावधि कस्यापि राजनैतिकदलेन एकोपि आक्षेपः न प्रदत्तः। परञ्च आयोगेन उक्तं यत् सूचीसम्बद्धे मतदातृभ्यः प्रत्यक्षतया सप्तत्यधिक नवशतोत्तर त्रयोदशसहस्राक्षेपाः प्राप्ताः।

## दिल्ली तिरंगा रैली

संस्कृतिमन्त्रालयेन अद्य नवीदिल्लीनगरे हर घर तिरंगा अभियानस्य अन्तर्गतं तिरंगा बाइक रैलीति यात्रा आयोजिता। संस्कृतिपर्यटनमन्त्रिणा गजेन्द्रसिंह् शेखावतेन केन्द्रीयमन्त्रिणा किरेन् रिजिजु इत्यनेन संजयसेठेन दिल्ल्याः मुख्यमन्त्रिणा रेखागुप्ता इत्यनया च यात्रायाः नितृत्वं कृतम्। आयोजने प्रवदन् श्रीशेखावतः उक्तवान् यत् तिरङ्गा राष्ट्रं कथं एकस्मिन् सूत्रे बध्नाति, अपि च देशस्य वीरभटानां स्मरणं च कारयति।

## ऋतुविभाग:

विगतदिनद्वये निरन्तरवृष्ट्या उत्तराखण्डस्य विभिन्नेषु भागेषु सामान्यजीवनं बाधितं जातम्। प्रचण्डवृष्ट्या प्रमुखनदीनां जलस्तरे तीव्रवृद्धिः अभवत्, पर्वतेषु पर्वतीयनद्यः अतिप्रवाहिताः सन्ति। ऋतुविभागेन हरिद्वार, नैनीताल, उधमसिंहनगराणां कृते रेड अलर्ट् सञ्चेतना प्रसारिता अस्ति। विभागेन गुरुवासरपर्यन्तं जम्मू-कश्मीरे हिमाचलप्रदेशे च अत्यधिकवृष्टेः रेड अलर्ट सञ्चेतनापि प्रसारितास्ति। आकाशवाण्या सह विशिष्ट संवादे ऋतुविभागस्य वरिष्ठः वैज्ञानिकः डॉ. आर के जेनामणिः अवदत् यत् श्वः तेलङ्गाना, आन्ध्रप्रदेश, ओडिशा, छत्तीसगढ़ेषु अत्यधिकवृष्टिः भविष्यति। जम्मू-कश्मीरे राजौरी-पून्छ-मण्डलयोः अधिकारिभिः अद्य प्रचण्डवृष्ट्या, प्रतिकूलऋतोः च कारणेन सर्वेषाम् विद्यालयानाम् पिधानस्य घोषणां कृतवन्तः।

अद्य जम्मू-राजौरी-राष्ट्रियराजमार्गः अपि भूस्खलनेन अवरुद्धः अस्ति, येन आवागमन बाधितं जातम्। पंजाबराज्ये अद्यापि केषुचित् भागेषु प्रातःकालादेव वर्षा प्रचलति।

**चीन-वुशु**

नम्रता बात्रा इत्यनया वुशुक्रीडायां चीनदेशस्य चेङ्गडु-नगरे विश्वक्रीडायां भारताय प्रथमपदकं प्रदत्तम् ।

**आईसीसी-गिल**

भारतस्य टेस्ट् क्रिकेट दल नायकः शुबमन गिल् जुलाईमासस्य ICC पुरुषेषु मासस्य उत्तमः क्रीडकत्वेन नामाङ्कितः। एषः गिल् इत्यस्य चतुर्थः क्रीडक-सम्मानः अस्ति।

।। इति वार्ता: ।।